द्यते सूचीभिरिव विध्यते। निर्मथ्यते मथनेनेव दीर्य्यते करपत्रेण द्विधाक्रियत इव। स्फोट्यते अस्त्रेणेव पाट्यते कुठारेण बहुधाक्रियत इव। अथ पैत्तिकमाह "हृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदये क्लमः। धूमायनञ्च मूर्च्छा च स्वेदः शोषो मुखस्य च"। तृष्णा शीतगात्रस्येव शीतवाताभिलाषहेतुः किञ्चिदिवोष्णत्वम्। दाहः पार्श्वस्थेन वह्निनेव दुःखहेतुर्गात्रस्य सन्तापः। चोषः चूषणेनेव पीड़ा। हृदये क्लमः हृदयाकुलत्वं ग्लानिर्वादित्यर्थः। धूमायनम् कण्ठाद्धूमनिर्गमः। क्लेदः किञ्चिद्दुर्गन्धः शटित इव। वातस्त्रैष्मिकमाह "गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम्। माधुर्य्यमपि चास्यस्य बलासावतते हृदि"। बलासावतते हृदि कुपितकफव्याप्ते गौरवं हृदयस्य। स्तम्भो जड़ता। माधुर्य्यं जलप्लुतमिव माधुर्य्यं मुखे। त्रिदोषजमाह "विद्यात्त्रिदोषमप्येवं सर्वलिङ्गन्तदामयम्"। क्रिमिजमाह क्रिमयो जायन्ते अस्मिन्निति क्रिमिज इति निरुक्तिः। तस्य विप्रकृष्टनिदानपूर्विकां सम्प्राप्तिमाह "त्रिदोषहेतुहृद्रोगे यो दुरात्मा निषेवते। तिलक्षीरगुड़ादींश्च ग्रन्थिस्तस्योपजायते। मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति। संक्लेदात् क्रमयश्चास्य पतन्त्युपहतात्मनः"। मर्मैकदेशे हृदयैकदेशे संक्लेदं शटितत्वं रसं उपगच्छति। संक्लेदात् रसस्य शटितत्वात् उपहतात्मनः तिलाद्यहिताहारेण। तस्य लक्षणमाह "उत्क्लेदः ष्ठीवनन्तोदः शूलं हृल्लासकस्तमः। अरुचिः श्यावनेत्रत्वं शोषश्च क्रमिजे भवेत्"। उत्क्लेदः वमनमिवोपस्थितम्। शोषो वक्त्रस्य। हृद्रोगस्योपद्रवानाह "क्लमसादौ भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः। क्रमिजे तु क्रमीणां ये स्त्रैष्मिकाणां हि ते मताः"। क्लमः पिपासायासः। सादः शोषः। शोषो मुखस्य। तेषां हृद्रोगाणां, क्रिमिजे तु हृद्रोगे स्त्रैष्मिकाणां क्रमीणाम् ये उपद्रवा हृल्लासात् स्रवणान्ता विपाकादयस्ते मताः" २कुम्भराशौ युक्तिदीपिका।

**हृद्रोगवैरिन्** पु० ६त०। अर्जुनवृक्षे शब्दर०।

**हृद्गण्टक** पु० ६त०। हृदयस्य विभाजके जठरे शब्दर०।

**हृल्लास** पु० हृदयस्य लासो यत्र हृद्देशः। हिक्कारोगे हेमच०। तेन हि हृदयस्य स्फूर्त्तिरिव भवति।

**हृल्लेख** पु० हृदयं लिखति स्पृशति लिख–अण् हृद्देशः। १ज्ञाने राजनि०। २तर्के त्रिका०। ३तन्त्रोक्ते मन्त्रभेदे च। ४औत्सुक्ये स्त्री हला०। [उदित् हृषित्वा हृष्टा हृष्टः।

**हृष** चित्तोत्साहे भ्वा० पर० अक० सेट्। हर्षति अहर्षीत्।

**हृष** हर्षे चित्तोल्लासे दि० प० अ० सेट्। हृष्यति इरित् अहृषत् अहर्षीत् औत् हृष्टोऽस्मि। [हर्षति अहर्षीत्।

**हृष** मिथ्याकरणे भ्वा० पर० सक० सेट् उदित् क्त्वा वेट्।

**हृषित** त्रि० हृष–क्त वा० इट्। १प्रीते २विस्मिते ३प्रहते ४जातरोमाञ्चे च मेदि०। [अमरः।

**हृषीक** न० हृष–ईकक्। विषयग्राहके चक्षुरादौ इन्द्रिये

**हृषीकेश** पु० ६त०। विष्णौ अमरः। अन्तर्यामिब्राह्मणे तस्य सर्वनियन्तृत्वोक्तेः सर्वेन्द्रियप्रवर्त्तकत्वादीशत्वम्।

**हृष्ट** त्रि० हृष–क्त। १प्रीते २जातहर्षे अमरः। ३जातरोमाञ्चे ४विस्मिते च मेदि०।

**हृष्टमानस** त्रि० हृष्टं प्रीतं मानसमस्य। हृष्टचित्ते शब्दर०

**हृष्टरोमन्** त्रि० हृष्टमिव जाताङ्कुरं रोम यस्य। जातरोमाञ्चे पुलकिते त्रिका०। [धरणिः।

**हृष्टि** स्त्री हृष–क्तिन्। १आनन्दे २हर्षे ३ज्ञाने च

**हे** अव्य० हा–डे। १सम्बोधने २आह्वाने ३असूयादौ च मेदि०

**हेका** स्त्री हिक्का+पृषो०। हिक्कारोगे हेमच०।

**हेठ** विघाते भ्वा० प० सक० सेट्। हेठति अहेठीत्।

**हेठ** भूतौ उत्पत्तौ च अक० पवित्रीकरणे सक० क्र्य०प० सेट्। हेठति अहेठीत्। [हेठते अहेठिष्ट।

**हेठ** बाधने भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः।

**हेठ** पु० हेठ–घञ्। १बाधायाम् २विघाते च मेदि०।

**हेड** अनादरे भ्वा०आ०सक० सेट् ऋदित् चङि न ह्रस्वः हेडते अहेडिष्ट।

**हेड** वेष्टने भ्वा० प० सक० सेट् घटा०। हेडति अहेडीत्।

**हेड़ाबुक्क** पु० अश्वविक्रयकारके त्रिका०।

**हेति** स्त्री हन–करणे क्तिन् नि०। १अस्त्रे २अग्निशिखायां ३सूर्य्यकिरणे अमरः। ४तेजोमात्रे भरतः ५साधने च श्रीधरः।

**हेतु** पु० हि–तुन्। १कारणे अमरः २अनुमितिसाधने व्याप्ये ३फले च। हेतुत्वञ्च उत्पादकज्ञापकान्यतरत्वम्। दण्डो घटो जायते इत्यादौ उत्पादकत्वं पर्वतो वह्निमान् धूमादित्यादौ ज्ञापकत्वं तत्र ज्ञापकमेव लिङ्गशब्देन व्यवह्रियते। ४न्यायावयवभेदे तच्च लिङ्गप्रतिपादकतृतीयान्तपञ्चम्यन्तपदस्वार्थं तल्लक्षणन्तु अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्। हेतु-